॥ श्रीशं वन्दे ॥

संस्कृत-निबन्ध-संग्रहः ।

(संस्कृतपरीक्षोपयोगी)

—बागेवाडीकरोपनामा वासुदेवशर्मा

॥ श्रीशं वन्दे ॥

संस्कृत-निबन्ध-संग्रहः।

(संस्कृतपरीक्षोपयोगी)

विद्यार्थी कोल्हटकर म. रा. कराड यांस जानेवारी ५० मध्ये झालेल्या संस्कृत प्रथमा परीक्षेत द्वितीय क्रमांकाने, उत्तीर्ण झाल्याबद्दल पारितोषिक.

सम्पादकः प्रकाशकश्च (टिळक महाराष्ट्र विद्यापीठ)

महोपाध्याय पं. वा. गुं. वागेवाडीकरशास्त्री

काव्य-तर्क-वेद-तीर्थः, साहित्याचार्यः, आयुर्वेदाचार्यः।

मुख्याध्यापकः नगरपालिकासंस्कृतपाठशाला, संस्कृताध्यापकश्च

ह. दे. हायस्कूल, सोलापूर.

मूल्यं अष्टाणकाः] सर्वेऽधिकाराः सम्पादकायत्ताः। [विजयादशमी १८७१

अनुक्रमः

मुद्रकः—न. वि. सरदेशपांडे, आदर्शमुद्रणालय, ३९५।५ सदाशिव, पुणें

संस्कृत-विद्या-मण्डलस्य मन्त्रिणां

परिचयः ।

अयि प्रियबालपाठकाः । अद्य महान् मे सन्तोषः, अस्य संस्कृतनिबंध-संग्रहस्य परिचयं निवेदयितुम् । पं. बागेवाडीकरशास्त्रिमहोदयैः स्वयं सम्पादितस्यास्य संग्रहस्य अभ्यासेन बालाः संस्कृतनिबन्धलेखने पाटवं लभेरन इति दृढं विश्वसिमि । बालानां कृते सुलभनिबन्धवाङ्मयं संस्कृतेऽतीव विरलं वर्तते । तेनैतादृशस्य पुस्तकस्यात्यन्तमावश्यकता वर्तते ।

पं. बागेवाडीकरशास्त्रिणः सर्वदैव अध्ययनाध्यापनाभ्यां विद्याराधनपराः सन्ति । साहित्य इव व्याकरणन्यायमीमांसायुर्वेदादिषु दुरूहेषु शास्त्रेष्वपि ते कृतपरिश्रमाः सन्ति । आंग्लपाठशालायां प्राचीनसंस्कृतपाठशालायां च नैकच्छात्रान् नैकविषयान् नैकसंवत्सरांश्च ते समध्यापयन्ति । तेन उभयविधापि शिक्षणप्रणाली तेषां सुपरिचिता विद्यते । कठिनतरोऽपि विषयः सुलभया क्रमानुसारिण्या च पद्धत्या कथंकारं पाठनीयः, कथं च विद्यार्थिनां जिज्ञासा प्रतिवेलं वर्धेत, कथं च तस्या अनायासेनोपशमो भवेत्, कथं वा छात्राणां भूयोऽपि अध्ययने स्वाभाविकी प्रवृत्तिर्भवेदिति सर्वमेव समीचीनया विचारधारया निश्चित्य अमुं संग्रहं ते समग्रन्थन् इति अत्रत्यान् कांश्चन निबन्धान् पठतो मे मतिः सञ्जाता ।

टिळकमहाराष्ट्रविद्यापीठेन प्रचालितानां संस्कृतपरीक्षाणां प्रश्नपत्रिकासु निबन्धलेखनरूपः प्रश्नो वर्तते । तत्र प्रथमा-द्वितीया-तृतीया परीक्षार्थं उपस्थातुकामानां परीक्ष्याणां कृते एतादृशनिबन्धाभ्यासो महते गुणलाभाय कल्पेत । आंग्लपाठशालासु स्वयं प्रयत्नेन वा संस्कृतभाषामध्येतुकामानामितरेषामपि अयं संग्रह उपयुक्तो भवेत् । अतः सर्वेऽपि च्छात्रा अमुं संग्रहं संगृह्णीरन्, अभ्यासेन च संस्कृतनिबन्धरचनायां पाटवं च विन्देरन् इति आशासे ।

टिळकमहाराष्ट्रविद्यापीठं
पुण्यपत्तनं २.

वा. बा. भागवत
"व्याकरणरत्नं"
मन्त्रिणः संस्कृतविद्यामण्डलस्य

निवेदनम्।

प्रमोदास्पदमेतद् यत् प्रतिदिनं सम्प्रति सर्वत्र संस्कृताध्ययने छात्राणां प्रवृत्तिर्वर्धत एव। तथा हि सहस्रशो विद्यार्थिनः प्रान्तेऽस्मिन् संस्कृतपरीक्षामुपतिष्ठन्ति साम्प्रतम्। संस्कृतपरीक्षासु निबन्धरूपः प्रश्न एको विद्यते। संस्कृतभाषायां तादृशनिबन्धग्रन्थानां प्रायशोऽभावात् प्रबन्धरचनायामुपहतमतीन् परीक्ष्यान् विलोक्य कैश्चित् सुहृद्भिः पण्डितैः प्रेरितोऽहमस्य निबन्धसंग्रहस्य संग्रहे मतिमकरवम्।

अस्मिन् कार्ये व्याकरणवेदान्तविशारदाः पं. लऊळकरशास्त्रिणः, न्यायमीमांसादितीर्थपदवीभाजः पं. उमर्जीशास्त्रिणः, काव्यतीर्थपदभाजः पं. धूपकरमहोदयाः इत्येतैर्विद्वद्भिरुपयुक्तसूचनप्रदानेन, तथा च व्याकरणरत्नपदभूषितैः पं. बा. बा. भागवत–महाशयैः संस्कृतविद्यामण्डलस्य मन्त्रिभिः परिचयप्रदानेन सुतरामुपकृतोऽस्मि।

एतस्मिन् संग्रहे परीक्ष्याणां परीक्षाक्रमानुरोधेन निबन्धानां विनिवेशनं विहितम्। निबन्धविषयाश्च संगृहीताः। आदौ केषुचित् स्थानेषु सन्धिः पाठकानां सुखबोधाय सर्वथा परिहृतः। ततः परं क्वचिदनेनैव हेतुना न विहितः। अस्य साहाय्येन बालाः सर्वासु परीक्षासु निबन्धविषये बाढं उत्तीर्णतां सम्पादयेयुरिति मे विश्वासः। इति शम्।

विजयादशमी १८७१
१६ मुरारजी पेठ,
सोलापुर

विदुषामनुचरः
वासुदेवाचार्यः

॥ संस्कृत-निबन्ध-संग्रहः ॥

१. प्रातः कालः ।

सूर्योदयात् पूर्वं अरुणेन निशायाः तमः निरस्तम् । आकाशे तारकाः निष्प्रभाः सञ्जाताः । पूर्वदिग्भागे शुक्रः प्रकाशते । मन्दं मन्दं सञ्चरति शीतलः प्रभातवायुः । जनाः शय्यां त्यजन्ति । छात्राः मुखं प्रक्षालयन्ति स्नानं आचरन्ति स्वपाठान् च पठन्ति । केचिद् देवं पूजयन्ति । ललनाः गृह-कार्येषु व्यग्राः विद्यन्ते । कृषीवलाः क्षेत्राणि गच्छन्ति तानि च कृषन्ति । भक्ताः देवालयं व्रजन्ति तत्र घण्टां वादयन्ति देवं च प्रणमन्ति । वृक्षेषु खगाः मधुरं कूजन्ति इतस्ततः डयन्ते च । दिशाः प्रसन्नाः । पूर्वा दिशा आरक्ता । तत्र रक्तं सूर्यबिम्बं दृष्टिगोचरं भवति । पादपेषु पर्वताग्रेषु च कोमलाः सूर्यकिरणाः सुवर्णमयाः प्रकाशन्ते । सूर्योदयेन लोकाः चैतन्यं प्रपद्यन्ते । श्रीसूर्याय नमः ।

प्रश्नः – चन्द्रोदयं सूर्यास्तसमयं वा वर्णयत ।

२ वसन्तः ।

मासस्य दिनानि त्रिंशत्[1] । मासस्य द्वौ पक्षौ शुक्लः कृष्णः च । द्वादशानां मासानां एकः संवत्सरः । संवत्सरस्य षट्[2] ऋतवः । षट्सु ऋतुषु वसन्तः परमाल्हादकः । तत्र ग्रीष्मर्तौ इव सूर्यः चण्डः न तपति । वसन्तः विविधानां मनोहराणां सुगन्धीनां कुसुमानां शोभया खलु शोभते । वृक्षराजिः विराजते नवपल्लवैः । नानाविधैः पुष्पैः मञ्जरीभिः फलैः च आनमन्ति वृक्षाः । पादपानां छाया पान्थेभ्यः क्लान्तेभ्यः अतीव रोचते । आम्रवृक्षेषु कोकिलाः मनोहरं कूजन्ति । मधुरं गुञ्जन्ति भ्रमराः । सायं प्रातः च सूर्यबिम्बं रम्यं दृश्यते । रात्रौ विशेषतः शुक्लपक्षे गगनं ताराभिः ज्योत्स्नया च प्रकाशते । शीतलो वाति

१ तीस. २ छहा.

वायु:। अयं ऋतु: सर्वेषां प्रियतम:। प्रवासाय वनविहाराय च अनुकूल: असौ। एष: कुसुमाकर: इति यद् वदन्ति तत् स्थाने[१] खलु। यत: अस्मिन् सर्वेषां कुसुमानां उद्गम: भवति। क: नाम न एतादृशं वसन्तं सेवेत।

प्रश्न: – ग्रीष्मर्तुं दीपावलिमहोत्सवं वा वर्णयत।

३ धेनु:।

सर्वेषु पशुषु धेनु: सौम्या वर्तते। धेनु: शुष्काणि तृणानि भक्षयति मधुरं च दुग्धं यच्छति। धेनो: दुग्धं लघु पाचकं पुष्टिदं च अस्ति। काचित् धेनु: दोहनसमये लत्तया प्रहरति। अत: गोप: तस्या: पश्चात् चरणौ रज्वा बध्नाति दोहनकाले। सा पिण्याकं[२] कार्पासबीजानि[३] च प्रीत्या खादति। तेन च प्रभूतं क्षीरं यच्छति। गोमूत्रं गोमयं च पवित्रं मन्यन्ते भारतीया:। धेनूनां दुग्धं दधि घृतं च एतानि देवकार्ये धर्मकार्ये च उपयुक्तानि। एतानि च निरामयानि वदन्ति। गोमयं गोमूत्रं च रोगाणां उपशान्तये भवत:। धेनो: पुमान् वत्स: वृषभ इति कथयन्ति। वृषभान् शकटेषु नियोजयन्ति। कृषीवला: वृषभाणां साहाय्येन क्षेत्राणि कृषन्ति। वृषभा: क्षेत्रकृत्येषु कर्षकाणां[४] भृशं उपयोगं आवहन्ति। अत एव गोधनं सर्वथा रक्षणीयम्।

प्रश्न: – अश्वं सिंहं वा वर्णयत।

४ नगरपालिका।

नागरिकाणां जीवनसौकर्याय प्रयतमाना संस्था नगरपालिका। सा प्रति-नगरं एका वर्तते। आरोग्यं शिक्षणदानं मार्गाणां सुगमत्वं गृहाणां सूपयोगित्वं एवमादीनि[५] नागरिकाणां हितकराणि कार्याणि समीक्षते समाचरति च सा। अस्या: कार्याणि सम्प्रति पौरै: निर्वाचिता:[६] सभ्या: विलोकयन्ति। निर्वाच-नात्[७] पूर्वं अधिकारिण: नियोजकानां[८] नामानि प्रथयन्ति। तै: एव सभासद: निर्वाच्यन्ते[९]। निर्वाचितानां सभासदां एका सामान्यसभा भवति। ते एव सभ्या:

---

१ योग्य. २ पेंड ३ सरकी ४ शेतकरी ५ इत्यादि. ६ निवडलेले ७ निवडणूक. ८ मतदार. ९ निवडले जातात.

सामान्यसभायां नगरपालिकायाः अध्यक्षं निर्धारयन्ति[१]। सः एव सामान्यसभायाः सभापतिः। नगरपालिकायाः सर्वं कार्यजातं सः च निरीक्षते। इतरे सभ्याः तस्मै साहाय्यं यच्छन्ति।

विविधकार्यानुसारेण अन्याः अपि समितयः वर्तन्ते। तासां तासां समितीनां कार्याध्यक्षान् समितिसभ्याः निर्वाचयन्ति। सर्वथा नगरस्य अशुभनिवृत्तये शुभप्रवृत्तये च इयं नगरपालिका प्रस्थापिता पौराणां प्रातिनिधिका संस्था।

प्रश्नः – सहकारिसंस्थां विधिमण्डलं च वर्णयत।

---

५ कृषीवलः।

कृषिप्रधानः अयं अस्माकं देशः। गोधनं कृषीवलानां परमं धनम्। पुरा खलु वयं एतेन एव धनबाहुल्येन परां प्रतिष्ठां गताः। कृषीवलाः क्षेत्राणि कृषन्ति धान्यं च उत्पादयन्ति। क्षेत्राणि शुष्काणि[२] आर्द्राणि[३] च भवन्ति। आर्द्रक्षेत्रेषु शालयः गोधूमाः क्वचित् च यावनालाः[४] जायन्ते। अत्र देवमातृकाणि[५] एव क्षेत्राणि बहुतराणि सन्ति। यदि नाम अयं देशः नदीमातृकः[६] जायेत ततः अधिकं धान्यं समुत्पद्येत। सम्प्रति पर्याप्तं धान्यं कार्पासं च न सञ्जायते अत्र। तेन अन्नस्य वस्त्रस्य च दुर्भिक्षं प्रसरति सर्वत्र। गोधनहानिः कृषिकार्ये अनवधानं साधनाभावः यथाकालं वृष्टेः अभावः च एतानि अन्यानि च कारणानि विद्यन्ते तत्र। पारतन्त्र्यात् अद्यावधि कृषिव्यवसाये या अनवधानता आसीत् सा अधुना स्वतन्त्रत्वात् अचिरादेव दूरीभवेत् इति दृढा आशा वर्तते। अस्मिन् विषये मन्त्रिणः राष्ट्रस्य नेतारः च अभिनिवेशेन प्रयतन्ते। यत् कृषकसमाजः[७] यथा धनसम्पन्नः भवेत्। कृषिकार्यस्य उपयोगि पशुधनं न नश्येत् इति। येन इयं भारतभूमिः नचिरात् सस्यपूर्णा भवेत्।

प्रश्नः – ग्रामनगरयोः क्व निवासः युष्मभ्यं रोचते ?। कारणैः सह लिखत।

---

१ निवडतात. २ कोरडवाहू. ३ बागाईत. ४ ज्वारी. ५ पावसानें पिकणारें. ६ कालवे पाट इ. च्या पाण्यानें पिकणारा. ७ शेतकरी वर्ग.

६ वाणिज्यम् ।

वाणिज्यं नाम पदार्थानां क्रयः विक्रयः च। वाणिज्येन यः धनं लभते सः वणिक्। तं च वैश्यं प्राहुः। क्रीतान् पदार्थान् मूल्याधिक्येन विक्रीणीते वैश्यः। पदार्थानां आनयनादिषु कश्चिद् व्ययः भवति। पदार्थानां मूल्यं व्ययं च वर्जयित्वा यत् धनं लभते सः तस्य लाभः। इयं अत्र तण्डुलगोधूमादीनां विपणिः[१]। तत्र वस्त्राणाम्। इतःच सुवर्णादीनाम्। विक्रयिणः ग्राहकान् विविधानि वस्तूनि दर्शयन्ति वर्णयन्ति तानि बहुविधं कथयन्ति च तेषां मूल्यानि तेभ्यः।

सम्प्रति नगरे सर्वत्र राजमार्गे अनेकानि उपाहारगृहाणि विलसन्ति। तत्र गत्वा बहवः लोकाः मूल्यं दत्वा नानाविधानि पेयानि पिबन्ति। अपूपान्[२] शष्कुलीः[३] अन्यानि च भक्ष्याणि भक्षयन्ति च। अपूपशालानां[४] स्वामिनः खाद्यपेयानां विक्रयेण धनं अर्जयन्ति। अतः ते अपि वणिजः एव। एतादृशं बहुप्रकारं वाणिज्यं वर्तते। वरं वाणिज्यं सेवायाः।

प्रश्नः – निबंधं लिखत "कृषिवाणिज्ययोः कतरत् श्रेष्ठम्" ? ॥

७ आश्रमः।

अयं अत्र रम्यः पावनः आश्रमः। अयं सपुष्पैः सफलैः पादपैः उपशोभितः। आश्रमस्य समीपे वहति नदी। मुनयः छात्राः च नद्याः विमले जले प्रातः स्नानं आचरन्ति। विविधान् ग्रन्थान् पठन्ति शिष्याः। मुनयः सकलशास्त्रार्थान् विचारयन्ति। अस्मिन् सायंप्रातः अग्निकार्यं प्रचलति। इतः बटुभिः उपहृतानां दर्भाणां पूलाः[५] वर्तन्ते। इतः समिधः आतपे शुष्यन्ति। तत्र हरिणाः विस्रब्धं तृणानि भक्षयन्ति। अत्र मृगशावकाः नीवारकणान्[६] खादन्ति। पक्षिणः वृक्षेषु मधुरं कूजन्ति। भक्षयन्ति च मधुराणि फलानि यथेच्छम्।

तोयाधारेषु[७] स्वच्छं मधुरं जलं वहति। तत् पशवः खगाः च आनन्देन पिबन्ति। अयं अत्र कुरङ्गशावकैः सह क्रीडति केसरीन्द्रः। तत्र च सिंहशिशुः पिबति धेनोः स्तनम्। एते सर्वे स्वं स्वं स्वाभाविकं विरोधं त्यक्त्वा तपोवन-

---

१ बाजार पेठ. २ घारगा, वडा, अनरसा इ. ३ करंजी. ४ उपाहारगृह. ५ पेंढी. ६ देवसाळीचे कण. ७ पाट, कालवा.

निवाससुखं अनुभवन्ति किल । अयं अस्य महामुनेः प्रभावः । यः एषः अत्र वटवृक्षस्य च्छायां अधितिष्ठति । अधिपतिः असौ अस्य आश्रमस्य । महातपाः अयम् । दर्शनं एव अस्य पावनं किमुत समागमः । अमुष्य प्रसादात् एव तपोवनमिदं प्रशान्तवैरं अपगतमत्सरम् । धन्याः वयं अद्य । यतः अस्य महर्षेः दर्शनं जातम् ।

प्रश्नः – युष्माभिः दृष्टां यात्रां वर्णयत ।

---

८ अहिंसा ।

जीवानां वधः पीडाप्रदानं वा हिंसा । सा च शरीरेण वचसा मनसा च त्रिविधा भवति । कामक्रोधादयः हिंसायाः मूलम् । ते च तत्त्वज्ञानस्य प्रतिबन्धाः । इह परत्र च हिंसायाः अनिष्टं एव फलं लभ्यते । यथा आत्मनः प्राणाः इष्टाः तथा अन्येषां अपि । एतत् चिन्तयित्वा न कस्यापि प्राणिनः वधः कार्यः । पीडा वा न देया ।

अहिंसा नाम सर्वदा सर्वथा सर्वभूतानां अनभिद्रोहः । हिंसायाः अभावः अहिंसा । एकस्य अहिंसाव्रतस्य पालनेन एव सर्वाणि व्रतानि सम्पादितानि भवन्ति । अखिलतीर्थस्नानेन यत् पुण्यं लभ्यते ततः अपि अधिकतरं पुण्यं केवलेन अहिंसाव्रतेन सम्पद्यते । अहिंसाव्रतं धारयन्तः महामुनयः सिंहशार्दूलादिभिः हिंस्रैः आकीर्णं वनं सुखं अधिवसन्ति ।

एवं अहिंसा निखिलानां जन्तूनां प्रीतये भवति । अस्मिन् विषये–

" मनसा कर्मणा वाचा सर्वदाऽहिंसकं नरम् ।
रक्षन्ति जन्तवः सर्वे हिंसकं बाधयन्ति च ॥ "

इति पूर्वाचार्यैः उक्तम् । अतएव अहिंसा सर्वदा आश्रयणीया ।

प्रश्नः– सत्यं अस्तेयं वर्णयत ।

---

९ अर्धो घटो घोषमुपैति नूनम् ।

इह खलु बहवः जनाः । यथामति यथाशक्ति स्वे स्वे कर्मणि अभिरताः वर्तन्ते । तेषु अल्पाः एव संसिद्धिं लभन्ते । सिद्धिमन्तः जगति महतीं प्रतिष्ठां प्राप्नुवन्ति । अनपेक्ष्य स्वार्थं परहितं साधयन्तः स्वकर्तव्यं असङ्गं च कुर्वन्तः

गुणवन्तः भवन्ति सर्वेषां प्रशंसास्पदम्। तथापि ते स्वकार्यं स्वमुखेन न श्लाघन्ते : गुणग्राहिणः विद्वांसः तान् स्वयमेव स्तुवन्ति किल। परं न रोचते तेभ्यः आत्मप्रशंसा। न चापि तां कामयन्ते ते। प्रत्युत परेण कृतामपि स्वस्तुतिं शृण्वन्तो ते लज्जन्ते। अकृतकर्माणः हीनाः तु गुणहीनाः अपि परां प्रतिष्ठां अपेक्षन्ते। स्वस्य तिलमात्रकमपि कार्यं तालमात्रकेण गणयितुं अभिलषन्ति। स्पर्धन्ते खलु लोकोत्तरगुणैः परोपकाररतैः समं सततम्। परनिन्दया च स्वीयां प्रतिष्ठां प्रस्थापयितुं उत्सहन्ते।

अत्र एतत् कारणं मन्ये यत् परोपकारपराणां गुणवतां प्रतिष्ठा प्रशंसा वा सर्वत्र भवति एव। अतः तेषां स्वगुणानां प्रशंसायाः स्वमुखेन अवकाशः एव नास्ति। हीनानां तु गुणाभावात् न अन्ये गुणप्रसिद्धिं सम्पादयन्ति। अपि तु तेषां अवज्ञां एव लोके प्रथयन्ति। अतः ते स्वमुखेन एव आत्मस्तुतिं कृत्वा यथा कथञ्चित् समाधानं सम्पादयन्ति। तेन हि " अर्धो घटो घोषमुपैति नूनम् " इति कविना गदितम्।

प्रश्नः – " महान्तः प्रकृत्या मितभाषिणः " अस्मिन् विषये प्रबन्धं लिखत।

१० शीलं परं भूषणम्।

लोके विद्या धनं गौरवादिकं सर्वमपि सुलभम्। शीलं तु दुर्लभम्। " सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् " इति महाकविवचनस्यायमेवाभिप्रायः। धनारोग्यादीनि सुखार्थमेव प्राप्तव्यानि खलु मानवानाम्। गर्भैश्वर्यं नवयौवनं अमानुषसामर्थ्यं चेति महतीयं खलु अनर्थपरम्परा। सर्वाविनयानामेकैकमप्यायतनं किमुत समवायः ऐश्वर्ये प्रायो लुप्यति विवेकः। यौवने तु कालुष्यमुपयाति बुद्धिः। अमानुषसामर्थ्ये च जायते सर्वजनाधिक्षेपमतिः। विना शीलं नैव शोभन्ते सर्वाण्येतानि। महानर्थाय च कल्पन्ते। उदारः करुणासागरः सुशीलः निर्धनो वरं न त्वनुदारः कठोरः श्रीमान् दुःशीलः।

सुखं हि सहजं नैव लभ्यते। शीलभ्रष्टः क्षणं सुखं अनुभवतु नाम। परमाचारहीनैर्जनैः राष्ट्रोन्नतिर्नैव भवति। महान्ति राष्ट्राणि समृद्धानि च साम्राज्यानि शीलाभावादेवाधोगतिं प्राप्तानि। शुद्धान्तःकरणाः सच्छीला महाशया एव देशभूषणम्। तेषां शीलमेव देशमपायाद् रक्षति सौजन्यविनयप्रमुखाणां सर्वेषां गुणानां प्रधानकारणं शीलं परं भूषणम्।

प्रश्नः – " गुणाः पूजास्थानं " अस्मिन् विषये निबन्धं लिखत।

११ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

मानवेषु न्यूनोऽधिको वा वर्तत एव कोऽपि गुणः । तीक्ष्णबुद्धितया कश्चित् सत्वरं मन्दबुद्धितया कश्चन अध्यवसायेन कालान्तरेण तं प्रकटयितुमर्हति किल । सर्वथागुणहीनो न कोऽपि विद्यते । इह जगति नैव तदस्ति किञ्चिद् यदविरतप्रयत्नेन नैव सिध्येत् । प्रयत्नसाध्यं हि सर्वम् । "दैवं दैवं" इति सञ्चिन्त्य स्वोद्योगं न त्यजेत् । यतः पूर्वजन्मनि यत् कर्म शुभं वाऽशुभं वा कृतं तदेव दैवमित्याहुः । पौरुषेण विना दैवं न सिध्यति । यस्तु पौरुषं त्यक्त्वा केवलं दैवमेवावलम्बते तस्य सर्वाणि कार्याणि नश्यन्ति । यत्र उद्यमस्तत्रैव देवः साहाय्यं करोति । उद्योग एव परमेश्वरः । अनुद्योगिनः परमेश्वरो नास्ति । दैवं तु यत्नाधीनम् । यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।

अलसस्य कुतो विद्या कुतः कलाः कुतो धनं कुतो वा सुखम् । अथ सततं अध्यवसायिन एतत्सर्वं सम्पादयितुं शक्नुवन्ति । नास्त्युद्यमसमो बन्धुः । अतः पुरुषैरुद्योगः खलु कर्तव्यः । उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

प्रश्नः– "आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः" अस्मिन् विषये निबन्धं लिखत ।

---

१२ गङ्गायमुनयोः सङ्गमः ।

सकललोकपावनी पापनाशिनी भगवती भागीरथी नगाधिराजाद्धि । मालयात् प्रभवति । विष्णुपादाब्जसम्भूता स्वर्नदीयं प्रथमं भूलोके नासीत् । राज्ञा भगीरथेनोदग्रेण तपसा स्वपितुः प्रपितामहान् सगरपुत्रान् कपिलमुने रोषाग्निना प्लुष्टानुद्धर्तुं भुवं प्रापिता । तत एव च "भागीरथी" इत्याख्यां प्राप्नोत् ।

हिमालयादेवोद्गमं प्राप्ता पुण्या यमुना प्रयागेऽनया सङ्गच्छते । अयं सङ्गमः पवित्रयोर्नद्योरतीव रम्यः पावनश्च । कविकुलगुरुणा कालिदासेनायं हृदयङ्गमो वर्णितः ।

अत्र सङ्गमे गङ्गा यमुनातरङ्गैर्भिन्नप्रवाहा प्रभालेपिभिः इन्द्रनीलमणिभिरनुविद्धा मुक्ताहारावलिरिव विभाति । क्वचिन्नीलोत्पलैरुद्ग्रथिता पुण्डरीक-

मालेव राजते । क्वचिच्च नीलहंससंयुता राजहंसपङ्क्तिरिव भाति । कुत्रचित् कालागरुणा विरचिता पृथ्व्याश्चन्दनकल्पिता मुखभूषेव विराजते । अन्यत्र छायाविलीनैस्तमोभिः शबलीकृता चान्द्रमसी प्रभेव शोभते । अन्यत्र च रन्ध्रेषु आलक्ष्यनभःप्रदेशा शुभ्रा शरदि मेघपङ्क्तिरिव प्रकाशते । क्वचिच्च ईश्वरतनुरिव कृष्णोरगभूषणा भस्माङ्गरागा विराजति ।

अनयोः समुद्रपत्न्योः पवित्रे सङ्गमे स्नानात् पूतात्मनां त्यनुत्यजां तत्त्वज्ञानेन विनाऽपि भूयः शरीरबन्धो न भवति । विद्वद्भिर्ज्ञानादेव मोक्ष इत्युक्तेऽपि स्नानादेवात्र सङ्गमे मुक्तिर्भवति । एतादृशोऽस्य महिमा सङ्गमस्य गङ्गायमुनयोः । "गङ्गा पापं" इति वचनमिममेवार्थमभिप्रैति ।

प्रश्नः– नदीसमुद्रसङ्गमं वर्णयत ।

१३ विद्वान् सर्वत्र पूज्यते ।

भगवता विश्वसृजा प्रथमं विविधा वृक्षाः खगा मत्स्यादयो जलचराः पशवश्च सृष्टाः । तैरतृप्तमनाः सन् ज्ञानावबोधधिषणं पुरुषं सृष्ट्वा मुदं प्राप्नोत् । अत एव चोक्तं "ज्ञानेन हीनाः पशुभिः समानाः" इति । सर्वेषु सृष्टपदार्थेषु मानव एव ज्ञानविशेषाद् वरिष्ठः । ये नाम परमपुण्येन सुदुर्लभमिदं मानवजन्म समासाद्यापि कामक्रोधादिभिर्दोषैरावृता ज्ञानहीना दयाशून्या इमां वसुधां स्वभारेण पीडयन्ति ते खलु पशुपक्ष्यादिभ्योऽधमतया गण्यन्ते । ये तु दयादाक्षिण्यप्रमुखैर्गुणैः परोपकारादिभिः कृत्यैः स्वजन्म सफलीकुर्वन्ति त एव धन्याः । एतद्गुणशालितां प्रति विद्यैव प्रधानं कारणम् ।

विद्या विनयं ददाति । विनयात् पात्रतां याति नरः । पात्रत्वाद् धनम् । ततो धर्मम् । ततश्च सुखं प्राप्नोति । विद्याप्रभावादेव मनुष्यः पञ्चमहाभूतानि जेतुमलम् । विद्यासामर्थ्यादेव पृथिव्या राज्यमधिगन्तुं पालयितुं च प्रभवति नरः । यत्र कुत्रापि वसन् विद्वान् प्रतिपत्तुमर्हति त्रिभुवनवृत्तान्तं विद्यया । सम्प्रति जगति यानि यानि खलु विद्यन्ते सुखसाधनानि तानि तानि विद्ययैव सम्प्राप्तानि ।

बहवो विद्वांसो मर्त्यदेहं परित्यक्तवन्तोऽपि यशः शरीरैर्विराजन्ते ऽद्ययावत् । यत्सत्यं भारतं शासतः प्रधानमन्त्रिपदमलङ्कुर्वाणाः पण्डितजवाहीरलाल

महाभागाः स्वीयेनालौकिकेन विद्वत्त्वेन पाश्चात्यदेशेष्वपि बहुमानमनुभवन्ति भूषयन्ति च भारतम् ।

" स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते " इत्यार्यचाणक्यवचनं सर्वथा समीचीनम् ।

प्रश्नः – निबन्धं लिखत " विद्याविहीनः पशुः " इत्यत्र ।

१४ संसर्गजा दोषगुणा भवन्ति ।

संसर्गो नाम कस्यचित् केनापि सहैकत्रावस्थानादि । यस्य येन सह संसर्गो भवति तस्य गुणा वा दोषा वा तस्मिन् संक्रामन्ति । अनुकरणशीलः खलु प्रायेण प्राणी । यस्य सहवासं लभते तमेवानुकरोति । यं वाऽऽश्रयते तस्य गुणान् दोषान् वा संभजते ।

अधमस्याश्रयादधमो भवति मध्यमस्य मध्यमः उत्तमस्योत्तमः । तद् यथा– सन्तप्तायसि पतिता जलबिन्दवः सद्यएव लुप्ततां यान्ति । त एव नलिनीपत्रे पतिता मुक्ता इव विराजन्ते । स्वात्यां सागरशुक्तिसम्पुटगताः सुमुक्ता एव जायन्ते । एवंच नीचमध्यमोत्तमगुणानां सम्प्राप्तये संसर्गः प्रधानं कारणम् ।

गङ्गासङ्गेन नैर्मल्यं रथ्यादिभिरपि लभ्यते । अत एव मनुजेन दयासागरैः सच्चारित्र्यैः सद्भिः साकं संसर्गः कर्तव्यः । येषां सङ्गेन हिंस्रा अपि साधुभावं भजन्ते । महाकविनोक्तमेव " सत्सङ्गजानि निधनान्यपि तारयन्ति " इति ।

यथा सत्सङ्गोऽनुष्ठेयस्तथा परिहर्तव्योऽसत्सङ्गोऽपि । यतः " हीयते हि मतिस्तात हीनैः सह समागमात् । समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ "

तथाच–

" असतां सङ्गदोषेण को न गच्छति हीनताम् ।
त्रिदशैः पूजिता काली दासेन ह्रस्वतां गता ॥ " इति ।

अतः " संसर्गजा दोषगुणा भवन्ति " इति वचनं सम्यगवधार्य हितेच्छुना सदा सत्सङ्गो विधेयः ।

प्रश्नः – निबन्धं लिखत " स्वभावो दुरतिक्रमः " इति विषये ।

१५ शरीरमाद्यं खलु धर्मसाधनम्।

स्वास्थ्यशालिन एव शरीरिणो जगति सुतरामानन्दमनुभवन्ति। सर्वेषां "सुखमेव मे भूयात्" इति कामना नैसर्गिकी बलवती च। तस्याः पूर्तये यावन्त उपाया वर्तन्ते तावत्सु स्वास्थ्यं गरिष्ठं विद्यते। अस्मिन् सम्यक् सम्पादिते लोक उन्नतिमधिगच्छेत्।

स्वास्थ्यं हि द्विविधं मानसिकं शारीरिकं च। तत् खलु मनसः शरीरस्य च स्वभावेनावस्थानम्। सर्वथा तथा प्रयतितव्यं हितमिच्छता नरेण यथा तयोर्विकृतिर्न स्यात्। मनसा सह शरीरस्य सम्बन्धः सन्निकृष्टतमः। तयोरेकस्य विकृतिर्जायेत चेदन्यदपि विकृतिं प्राप्नुयात्। तत उभे अपि मन्थरे भवतः। बाल्ये यौवने वार्धके च यानि यानि कर्तव्यानि सन्ति तेषां सर्वेषां सिद्धये मानसवद् देहस्यापि स्वास्थ्यमावश्यकम्। आधिना व्याधिना पीडयमानाः सुमतयोऽपि न पारयन्ति स्वकर्तव्यमनुष्ठातुम्।

स्वास्थ्यरहिताः साम्राज्यपदे लुठन्तोऽपि सुखलेशमपि नाश्नुवते। अमृतायमानेषु खाद्यपेयेषु पुरः समुपनीतेषु बद्धस्पृहा अपि न ते स्वादलालसां परिपूरयितुं शक्नुवन्ति स्वास्थ्याभावात्। कुतो वा स्वधर्मानुष्ठानं कुतो वा परोपकारः। कुतो वा तपः कुतो वा संसारसुखानि। कुतो वा यशः कुतो वा देशसेवा। यः स्वदेहस्यापि न प्रभवति कुतोऽन्यस्य। नष्टस्वास्थ्यस्य नरस्य सर्वमपि साधनजातं केवलमनुतापाय कल्पते। तस्यास्मिन् संसारे जीवनं विडम्बनामात्रम्। अतः सुखनिधानं धर्ममूलं शरीरं सर्वात्मना रक्षणीयम्। अत एवोक्तं महाकविना कालिदासेन "शरीरमाद्यं खलु धर्म साधनम्" इति।

प्रश्नः– "आचारः परमो धर्मः" अस्मिन् विषये निबन्धं लिखत।

१६ आशावधिं को गतः।

दृश्यते चास्मिँल्लोके विषयोपभोगेषु स्वतः प्रवृत्तिः सर्वेषां जन्तूनाम्। सर्वेऽपि केवलं सुखमभिलषन्ति। परं सुखाशया प्रयतमानाः क्वचित् सफलमनोरथाः क्वचिच्च विफलमनोरथा भवन्ति। तथाप्याशा तान् नैव मुञ्चति। सर्वान् कामान् सम्परित्यज्य वनमधिवसन्तो मुनयः कन्दमूलफलाशिनो निः-

स्पृहा अपि मोक्षाशया सुतरां निबद्धा भवन्ति। चतुर्विधपुरुषार्थाः सर्वेषां पुरुषाणां काम्या एव। अपि च शिशुरपि क्षुत्पिपासानिवृत्तयेऽप्रेरितोऽपि केनापि स्तन्यमास्वादते। युवा स्वोन्नतये विद्यामुपार्जयितुं प्रयतते। प्रौढः सुखादिसंविधानाय द्रव्यसम्पादने बद्धपरिकरो भवति। वृद्धः परलोके सुखकामनया दिवानिशं पुण्यं सञ्चिनोति। तेन च मोक्षसुखमधिगन्तुं समीहते।

आशा हि दृढं हृदयबन्धनं जीवमात्रस्य। आशया सन्धार्यते जगदिदम्। आशयैवोन्नतिमादधाति। आशयैवाधोगतिं याति। आशाबन्धो गुरुतरमपि दुःखं साहयति। परोपकाररतानां प्रायः परोपकारवृत्तिः कीर्तिकाङ्क्षया क्वचिच्च परलोकलिप्सया। निरवधिः खल्वियमाशा। जनो यथा यथा काङ्क्षितं लभते तथा तथा इयमभिवर्धते च।

इत्थं बद्धोऽनया नरः कथमपि तस्या न विरमति। नापि मुक्तो भवति। अतः "आशावधिं को गतः" इति पद्यान्ते यत् कविना निर्णीतं तत् सर्वथा सत्यम्।

प्रश्न :— निबन्धं लिखत " सर्वः स्वार्थं समीहते " इमं विषयमुद्दिश्य।

---

१७ अविवेकः परमापदां पदम्।

विवेको नाम सदसद्विचारः विधेयेषु कार्येषु कदा किं कार्यं किं वा न कार्यं किं करणीयं किं वा सर्वथा न करणीयमिति विचारः कर्तव्य एव। सर्वेषु गुणेषु विवेकः साधिष्ठः। कार्याकार्यविचारेण ये कार्येषु प्रवर्तन्ते ते सुलभतया स्वकार्यसिद्धिं समधिगच्छन्ति।

अस्मिन् संसारे विपद्भिर्बहुभिर्मनुष्योऽनेकविधेषु कार्येषु भ्रान्तो भवति। परं तस्मिन् प्रसङ्गे तेन नितान्तं विवेकिना भाव्यम्। कार्यकाले यस्य यावान् विवेकप्रकर्षो भवति। स तावन्तमुत्कर्षं प्राप्नोति।

विवेकसम्पन्न एव नरो भूलोकेऽस्मिन् नानाविधं महत् कार्यं सम्पाद्य भृशं गौरवास्पदं भवति। स्वजन्म च सार्थकतां नयति। स एव स्वयं सुखं लभते परं च लम्भयते। प्रत्युत विवेकहीनः पुरुषः स्वकार्यं परकार्यं च घातयति। विपत्तिं चानुभवति। परकार्यपरा राज्यतन्त्रधुराश्च यदि विवेकिनो नो स्युस्ततो महाननर्थो जायेत।

विमृश्यकारिणं नरं गुणलुब्धाः सर्वसम्पदः स्वयमेव वृणते। विवेकभ्रष्टास्तु

राज्यं वैभवं कुलं यशः स्वजीवितमपि विध्वंसयन्ति । एवमविवेकोऽनर्थपरम्परामुत्पादयति । अतोऽविवेको विपत्तेः परमस्थानं वर्तते । तस्मादेव महाकविर्भारविर्वक्ति "अविवेकः परमापदां पदम्" इति ।

अयमेव कविरस्मिन् विषये भूयः कथयति—

"अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥"

प्रश्न:– "काले खलु समारब्धाः फलं बध्नन्ति नीतयः" अस्मिन् विषये प्रबन्धं लिखत ।

---

१८ प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।

कर्मनिघ्नं खलु प्राणिमात्रम् । यस्मिन् कस्मिन्नपि कार्ये विना प्रयोजनं प्राणिमात्रस्य प्रवृत्तिर्न सम्भवति । किमपि प्रयोजनमालक्ष्यैव सर्वः प्रवर्तते सर्वत्र । प्रवर्तिते कार्ये प्रवृत्तेर्मूलं किमपि भवत्येव । निष्प्रयोजना प्रवृत्तिर्न क्वापि दृश्यते । अपि च प्रयोजनाद्विना न कोऽपि कस्यापि कार्यस्य धुरं वोढुं क्षमते । प्रयोजनमन्तरा मूढस्यापि कस्मिन्नपि कर्मणि प्रवृत्तिर्न सम्भवति किमुत प्राज्ञस्य ।

भूतेष्वनुकम्पाऽपि यशसे पुण्याय वा भवति । निष्कामं कर्म नाम सङ्गरहितं कर्म । न तु निष्प्रयोजनं कर्म । फलासक्तिं विना यत् कर्म क्रियते तदेव निष्कामं कर्म इत्यभिधीयते । तत्रापि हेतुर्विद्यत एव । अर्जुनं निष्कामकर्मोपदिशता भगवतैव तत्र हेतुरुक्तः । "हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इति । कर्तव्यरूपे युद्धे स्वस्य नाशे सति स्वर्गप्राप्तिः । विजये तु पृथ्वीराज्योपभोगः स्वर्गलाभश्च ।

विरक्तस्यापि तपोऽनुष्ठानं प्रपंचोद्वेगमूलकं मोक्षप्रयोजनवद् भवति । नूनं क्रियाफलं कर्तारमभिप्रैति । न च कर्तव्यानुष्ठाने विधिमात्रं प्रवृत्तिहेतुः । अनिच्छतो विधीनां शतेनाप्यप्रवृत्तेः । अत एवाहुः "न हि विधिशतेनापि तथा पुरुषः प्रवर्तते यथा लोभेन" इति ।

तथा च भगवान् पतञ्जलिर्वदति महाभाष्ये–" नेह कश्चित् परोऽनुगृहीतव्य इति प्रवर्तते । सर्व इमे स्वभूत्यर्थं प्रवर्तन्ते ये गुरुशुश्रूषवो नाम तेऽपि

स्वभूत्यर्थमेव प्रवर्तन्ते । पारलौकिकं नो भविष्यति । इह च नः प्रीतो गुरुरध्यापयिष्यतीति । तथा यदेतद् दासकर्मकरं नाम । एतेऽपि स्वभूत्यर्थमेव प्रवर्तन्ते भक्तं चेलं च लप्स्यामहे परिभाषाश्च न नो भविष्यन्तीति । तथा य एते शिल्पिनो नाम । तेऽपि स्वभूत्यर्थमेव प्रवर्तन्ते । वेतनं च लप्स्यामहे मित्राणि च नो भविष्यन्तीति " एवं च मन्दो वा प्राज्ञो वा विना प्रयोजनं न क्वापि प्रवर्तत इति सुस्पष्टम् ।

प्रश्न :–" कर्मण्येवाधिकारस्ते " अथवा " कर्मयोगमहत्त्वम् " अत्र विषये प्रबन्धं लिखत ।

---

१९ अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ।

लोके प्रायो नरो विनायासेन स्वल्पायासेन वा स्वकार्यं साधयितुं वाञ्छन्ति । उद्योगं विना धनं अभ्यासेन विना विद्या विना पराक्रमाद् रणे विजयश्रीर्वा लभ्येत चेदिष्टमेव सर्वेषाम् । यद्यल्पश्रमान्महतः कर्मणः समं फलं जायेत ततो न कोऽपि महता श्रमेण साध्ये कार्ये प्रवर्तेत । इष्टार्थसिद्धिर्हि विनायासं स्याच्चेत् तस्य संसिद्धौ को वा विद्वान् महान्तं यत्नमाचरेत् । सर्वत्र तु स्वकार्यपूर्तये दिवानिशं प्रयतमाना एव दृश्यन्ते । तथा हि धर्मार्थकाममोक्षा एते चत्वारः पुरुषार्थाः । आपततो विचार्यमाणे तेषु धर्मोऽर्थः कामश्च त्रय एतेऽल्पश्रमसाध्या दृश्यन्ते । परं तेषामपि प्राप्तये बहुतरं कष्टमनुभवन्ति जनाः । मोक्षस्तु सुदुःसाध्यः । तदर्थमायासवन्ति कर्माणि समाचरणीयानि खलु । इयं पुरुषार्थसिद्धिः सहजैव भवेत् ततः को वा कर्माण्युदग्राणि कुर्यात् । महत् तपो वा समाचरेत् । अत्र विषये श्रीमच्छंकराचार्याः प्राहुः " केवलाच्चेज्ज्ञानात् पुरुषार्थसिद्धिः स्यात् । किमर्थं तेऽनेकायाससमन्वितानि कर्माणि कुर्युः । अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति न्यायात् " इति ।

यथा पथि जातेऽर्के मधूत्सृज्य तेनैव पथा मध्वर्थिनः पर्वतं न व्रजेयुस्तथा स्वेष्टार्थसिद्धिः स्वगृह एव जायेत ततः को नु विद्वान् दूरं गच्छेत् । अल्पेन सिद्धे कार्ये न कश्चिन्महति श्रमे प्रवर्तेत । ग्रामान्तरं प्रस्थितस्य यदि मध्ये द्वौ मार्गौ समायातौ । एको दीर्घः अपरश्च लघुः । ततः स दीर्घेण मार्गेण किमर्थं यायादल्पं मार्गं परित्यज्य । अल्पेन मूल्येन लभ्यं तदेव वस्तु मूल्याधिक्येन कः प्राज्ञः क्रीणीयात् ।

प्रश्नः – " कः श्रेयान् मितव्ययी अमितव्ययी वा " वर्णयत ।

---

२० दारिद्र्यदोषो गुणराशिनाशी ।

इह खलु नानाविधं कार्यजातं धनेनैव सम्पद्यते । धनमेव प्रधानं साधनं सर्वेष्वपि व्यवहारेषु । धनहीनानां निखिला अपि मनोरथा विफला भवन्ति । दारिद्र्यवशात् ते सर्वत्र पराभूयन्ते विपद्यन्तेऽवसीयन्ते च । दारिद्र्यं नाम पुरुषस्य परमचिन्तास्थानं जुगुप्सानिदानं स्वजनजनविद्वेषकारणं च । प्रायेण स्वार्थान्वेषणपरा लोकाः स्वार्थहेतोरेव क्वाप्यभिरमन्ते दर्शयन्ति च भक्ति-सौहार्दादिकम् । निर्धने तु स्वार्थसिद्धिमनवलोकमानाः स्त्रीपुत्रभृत्यादयोऽपि प्रथयन्त्यवज्ञाम् । दारिद्र्योपहते जने न कान्ता प्रेमातिशयं न सुता भक्तिप्रकर्षं न वा भ्रातरः सौहार्दं प्रकटयन्ति । अपि चाजन्मसञ्जातस्नेहबन्धना अपि वयस्याः स्नेहभावाच्छिथिलीभवन्ति । सर्वगुणसम्पन्नोऽपि नरो दारिद्र्यदोषात् सर्वेषां हेलास्पदं भवति ।

निर्धनान् निरपराधिनोऽपि सापराधिनः, गुणवतोऽपि गुणहीनान्, साधुचरितानपि निन्द्यचरितान्, बुधानप्यबुधान्, समागमार्हानपि समागमानर्हान् मन्यन्ते जनाः । किं बहुना । अन्यकृतानपि दोषांस्तेष्वेवा रोपयन्ति । अत एव चोक्तम् –

"शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता" इति ।

इत्थं दरिद्रताऽनन्तगुणान् नाशयति । अन्वर्था किलेयमुक्तिः "दारिद्र्यदोषो गुणराशिनाशी" इति । एतस्य दोषस्य नाशाय धनान्यर्जयध्वं धनान्यर्जयध्वम् ।

प्रश्नः –निबन्धं लिखत "मानो हि महतां धनम् ।"

---

२१ दुर्भिक्षम् ।

पुरा क्वचिद् दुर्भिक्षं समजायतेति वार्ता श्रुतिपथमापतति । सम्प्रति तु प्रत्यक्षतयाऽनुभूयत एव । अनुदिनमधुना दुर्भिक्षमखिलं भारतमाक्रामति । वस्त्रस्य तु दुर्भिक्षताऽद्ययावन्न श्रवणपथमपि समागता । सम्प्रति यथा वयनयन्त्राणि अन्यानि च साधनानि समुपलभ्यन्ते न तथा पुरा । तथापि तदा नेदृशी वस्त्राभावता प्रादुरासीदिति पुराविदः कथयन्ति । इदानीं वस्त्राणामभावाल्लज्जामपि निवारयितुमक्षमाः केचन भारतीयाः स्वतनूं त्यक्तवन्तः । आत्मनः शिशुभ्यः

कवलमप्यन्नं दातुमपारयन्तः क्वचित् केचित् पितरो मातरश्च चिन्ताकुला अन्त्यां दशां सोढवन्तः।

जलदुर्भिक्षं तु नवीनमेव। शतशो ग्रामेषु नगरेषु च पिपासाशमनार्थमपि पानीयं न लभ्यते। कुतः स्नानाय वस्त्रक्षालनाय च। जलाभावाद् घासविरहाच्च हन्त पशवो नष्टप्रायाः। प्रतिजनपदमसंख्याः स्त्रीपुरुषा अनशनेनार्धाशनेन वा दिवसमतिवाहयन्ति। पशुसंक्षयाद् यथाकालं वृष्टेरभावाच्च दिने दिने सस्यक्षीणता वर्धत एव।

क्षुत्पिपासादीनां क्लेशेन सार्धं रोगा अपि प्रादुर्भवन्ति नवनवाः। येषां चिकित्साऽपि न सम्यग् विधीयते। केचिद् ग्रामा उत्सन्ना इव। कानिचिन्नगराणि रोगास्पदतया निवासानर्हाणि सञ्जातानि। कृषिप्रधानोऽयं देश एवं सस्यादीनां दुर्भिक्षेणानेकान् संवत्सरान् व्याप्यत इत्यहो विचित्रोऽयं दैवदुर्विलासः।

प्रश्नः – " चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च " अस्मिन् विषये प्रबन्धं लिखत।

---

२२ न कामवृत्तिर्वचनीयमीक्षते।

कामो नाम विषयस्पृहा। अल्पमपि पदार्थं सम्प्राप्य यथा वह्निकणः स्वदाहशक्तिं तथा प्रज्वलयति यथा निखिलेनापि जगता स तृप्तिं नायाति तथा कामो लेशतोऽपि मानवहृदयं प्रविष्टः सन् सर्वतस्तमाक्रमते। वन्यद्विप इव दुर्निगृह्योऽयम्। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयं काममृगतृष्णिका। भ्रमयति च पुरुषं दिङ्मोह इवोन्मार्गप्रवर्तकोऽसौ कामः।

त्रैलोक्याधिपत्यं दिगन्ती कीर्तिं वा प्राप्यापि कामवृत्तेः कामो नाणुरपि शाम्यति। उक्तं च–

' न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥ "

तथा च कामपरस्य तस्यान्तःकरणाल्लज्जा दूरमपसरति किल। अविनयो विनयं पराजयते। भीतिस्तु चित्तमपि न स्पृशति। लोकापवादोऽपि सान्निध्यं न भजते। विवेकाद् भ्रश्यति चेतः। धर्मधीर्लुप्यति। स यशो न गणयति। हिताहितं

नावबुध्यते। कुलपरम्परां नानुरुध्यति। किं बहुना। स स्वीयान् प्राणानपि तृणाय मन्यते। अपमानं पुरस्कृत्यैव स्वं कामं साधयितुं प्रयतते खलु सदा काममेव परमपुरुषार्थं मन्यमानोऽसौ।

प्रतिकूलभाषिणं हितमुपदिशन्तं पितरं मातरं भ्रातरं सुहृदं वाऽधिक्षिपति। अनुकूलवादिनं मनसि हसन्तमपि बहु मन्यते जनम्। इत्थं कामवृत्तिः किञ्चिदप्यगणयित्वा स्वकामपरतया जनकृतां निन्दां नावेक्षत इत्यत्र न चित्रम्। "न कामवृत्तिर्वचनीयमीक्षते" इत्येतत् पार्वत्या वचनं सर्वथा नानृतम्। परमुत्कर्षमिच्छता नरेण कामवृत्तिना नाम स्वच्छन्दचारिणा न भाव्यम्।

प्रश्नः – "अर्थातुराणां न पिता न बन्धुः।" इमं विषयमुद्दिश्य निबन्धो लेख्यः।

---

२३ तेजसां हि न वयः समीक्षते।

सिंहशिशुर्जातमात्रो गजेन्द्रानाह्वयते। अणुरपि वह्निर्महारण्यं दहति। तनुरपि दीपस्तमो नाशयति। स्थूलशरीरोऽपि मत्तेभोऽङ्कुशवशो भवति। गन्धद्विपः कलभः सन्नपि गजानन्यान् शमयति। बालोऽपि क्षात्रकुलावतंसो राजा पृथ्वीं परिरक्षितुं समर्थो भवति। भुजगशिशुरपि उदग्रविषोऽस्ति। वज्राघातेन महान्तो गिरयः पतन्ति। एतेषां सर्वेषां तेज एकमेव प्रधानं कारणम्।

तेजो यस्य विराजते स बलवान्। जात्यं तेजो न मूर्तिमपेक्षते। सत्त्ववतां प्रकृतिरियं यत्स्वपराक्रमदर्शनम्। न खलु वयस्तेजसो हेतुः। तेजस्विनां तेज एव पूजास्थानं न वयः न कुलं, न लिङ्गं, न च मूर्तिः। गोपकुलसम्भवं बालकृष्णं वासुदेवं सर्वे नमन्ति न च वसुदेवम्। अध्वरविघातशान्तये महामुनिना विश्वामित्रेण काकपक्षधरोऽपि रामो याचितः। न च वृद्धो दशरथो न वा तस्य महती सेना। सर्वेऽपि धर्मप्रवर्तका आचार्या राजानश्च बाल्य एवोदयं प्राप्ताः।

तेजस्विनां तेजो न केनाप्याक्रमितुं शक्यते। सूर्याचन्द्रमसोः प्रकाशो मेघशतैरपि नाव्रियते। शलभसहस्रैरपि नाग्नेर्ज्वालाः शाम्यन्ते। तेजस्विनां तेजो मन्दा यथा यथा प्रशमयितुं प्रवर्तन्ते तथा तथा तदभ्यधिकं प्रकाशते।

"सर्वं बलवतः पथ्यं" इति न्यायानुसारेण तेजस्विनां सर्वमपि हितमनुकूलं च भवति। ते यद् यदाचरन्ति यद् यत् प्रमाणं कुर्वन्ति यद् यद् ब्रुवन्ति तत् तत् सर्वं सर्वेऽनुमन्यन्ते। तत्र प्रमादशङ्काऽपि नोद्भवति कस्यापि। सर्वः प्रत्येति। उक्तं च श्रीमद्भागवते—

"धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्।
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा॥"

तेजस्वी दूरस्थोऽन्तिकस्थो वा भवतु स निखिलैराद्रियते। यत उक्तं च

"तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम्॥"

इत्थं च तेजस्विनां तेज एव सर्वेषामादरस्थानं नान्यत्।

प्रश्नः—"पदं हि सर्वत्र गुणैर्निधीयते" अस्मिन् विषये निबन्धो लेखनीयः।

२४ शरदृतुः।

सम्प्रति गम्भीरनिर्घोषा मेघाः सुवृष्ट्या वसुन्धरां तर्पयित्वा निष्पन्नसस्यां च कृत्वा लोकं परितोष्य नदीतटाकानि च पूरयित्वा परिशान्ताः। ते विगतमदा गजेन्द्रा इव शान्तवेगाः सञ्जाताः। मयूराणां प्रस्रवणानां च नादः सहसा प्रशान्तः। महामेघैरभिवृष्टा निर्मला गिरयो निशि चन्द्ररश्मिभिरनुलिप्ता इवाभान्ति। मनोज्ञगन्धैः पुष्पभारावनतैर्नयनाभिरामैः पादपैर्वनान्तराणि प्रकाशन्ते। दिशः प्रसन्नाः। अपेतपङ्कासु प्रसन्नजलासु नदीषु हंसा हृष्टाः सन्तो निपतन्ति। रात्रिः शशाङ्कोदयेन शुक्लांशुकेन संवृता नारीव विभाति।

हंसा विरावे मयूरानतिशेरते। तेषां स्वनैर्निर्जितकेका मयूराः स्वबर्हाणि विमुञ्चन्त्यक्षमयेव। निर्भर्त्सिता इव दीनाश्च प्रयान्ति। शालिगोप्त्रीणां मधुरकोमलेन गीतेनैव मृगाः सस्यभक्षणाद्विरमन्ति। सुगन्धिर्वायुर्गुञ्जद्भिर्मधुपैः कार्तिको मत्तमतङ्गज इवाकुलीकृत जगत्त्रय आगच्छतीति निगदन् वाति।

इदानीं दिशः क्वचिद् विगतमेघावरणाः कोशादुद्धृता असिलता इवाभान्ति। क्वचिच्च शुभ्रघनपटलच्छन्ना ऐरावतचर्मपरिवृता इव द्योतन्ते। प्रसन्नं जलं समदं क्रौञ्चस्वनं विपक्वं शालिवनं मृदुर्वायुर्विमलश्च चन्द्र एते वर्षव्यपनीतकालं शंसन्ति।

प्रश्नः—हेमन्तं वर्षाकालं वा वर्णयत।

२५ साहसे श्रीः प्रतिवसति ।

धर्मार्थकाममोक्षाणां चतुर्विधपुरुषार्थानां सम्पादनायात्मरक्षणं प्रथमं कारणम् । आत्मरक्षणेनैव सर्वं रक्षितं भवति । अतोऽपायादात्मानं सततं रक्षेत् । यत्र स्वजीवितस्य संशयो वर्तते तत्र न कदापि प्रवर्तितव्यम् । आत्मरक्षणे कृते सर्वं रक्षितं भवति । आत्मनाशे सति सर्वं च नश्यति ।

"आत्मानं सततं रक्षेद् दारैरपि धनैरपि" इति वचनमेतदेवाभिप्रैति । एवं चात्मरक्षणं गरिष्ठं प्राथम्यं च भजते । इति बहूनां मतम् । परं सततमपायादात्मरक्षणमेव कुर्वन् सन्ततमात्मनमेव चिन्तयति । एवमात्मरक्षणपरः स्वार्थमेव सदा साधयेत् । परार्थं न किञ्चिदपि कर्तुमुत्सहेत । कथमपि किमपि कर्तुं प्रवृत्तश्चेत् । पदे पदे सहस्रशः शङ्का उत्पद्यन्ते तस्य मनसि । इत्थं स भीरुः स्वार्थपरायणश्च भवति । स्वार्थपरः पुरुषः स्वदेशस्य स्वधर्मस्य स्वबान्धवस्य च न किमप्युपकरोति । स केवलं स्वोदरमेव बिभर्ति । एतादृशस्य जीवितेन किम् ।

आत्मरक्षणपरस्य वचनस्यैतादृशो नाभिप्रायः । किन्तु विवेकाभावादात्मा सङ्कटे न पातयितव्य इति । "न हि निन्दा निन्द्यं निन्दितुं प्रवृत्ता । अपि तु स्तव्यं स्तोतुं" इति न्यायाज्जनहितकरणे देशहितसाधने च देहनाशो जायेत चेत् तदिष्टमेव । बहुहेतोरल्पं हातुमिच्छन् विवेकशील एव न तु साहसिकः । एतदर्थमेवात्मानमपायात् सदा रक्षेत् । स्वोदरपूरणतुल्ये क्षुद्रकार्ये देहनाशो मा भूदित्येव तदभिप्रायः । अस्तु ।

अन्यथामार्गगामिनो बहून् क्लिष्टाञ्जनान् सत्पथमानेतुं बहुभिः पूर्वाचार्यैः स्वात्मा क्लेशितः । अनेके साधवो देहपातमप्यगणितवन्तः । केचित् परोपकाररता आत्मनिरपेक्षाः साहसं नावालम्बिष्यन्त चेद् विद्युदग्निरथविमाननभोवाणी वायुसन्देशादीनि साधनान्यपूर्वाण्युपयुक्तानि नोपालप्स्यन्त ।

बालस्य ध्रुवस्य तपःप्रवृत्तिः, भक्तस्य प्रल्हादस्य हरिनामसंकीर्तनेऽभिनिवेशः, लोकमान्यतिलकगान्धिमहात्मादीनां स्वराज्यसम्पादने प्रतिज्ञा च, एतत्सर्वं साहसमेव । परमेतादृशेन साहसेनैव नरस्य जगतां चाभ्युदयो जातः । अत एव चोक्तं "साहसे श्रीः प्रतिवसति" इति ।

प्रश्नः – "सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता" अस्मिन् विषये निबन्धो लेख्यः ।

---

२६ कालिदासः।

एतत्प्रायेण सर्वेषां भारतीयानां पाश्चात्यानां शिक्षितानां विदितमेव यत् पुरा विद्वद्वराणां मान्यतमः कविमूर्धन्यः कालिदासो नाम महाकविर्बभूव। अस्य महाकवेः कविवरेषु विद्वत्संसदि यादृशी प्रतिष्ठाऽऽसीत् तादृशी नान्यस्य कस्यापि। एतत् "पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाऽधिष्ठितकालिदासा" इति वचनेन ज्ञायत एव।

ईदृशः कविकुलगुरुः कालिदासः कदा क्व च जातः। कं देशं वंशं च स्वजन्मनाऽलङ्कृतवान्। इत्यस्मिन् विषये निर्णायकं प्रमाणं न लभ्यते। हन्त ! नितान्तमिदं शोचनीयम्।

विक्रमसंवत्प्रवर्तकस्य महाराजाधिराजस्य विक्रमादित्यस्य सभायां नवरत्नानामन्यतमः कालिदासो बभूव। इति केषाञ्चिन्मतम्। इतरे "न कोऽपि विक्रमादित्यो नाम शककर्ता नृपतिरासीत्" इति वदन्ति। अन्ये तु "विक्रमादित्य इति नैकस्य नाम" इत्याहुः। केचन "कालिदासः क्रिस्ताब्दस्य तृतीये शतके जन्म लब्धवान्" इति ब्रुवन्ति। केचित् तु "क्रिस्ताब्दस्य पञ्चमे शतकेऽयं कविवर्यो विराजते स्म" इति कथयन्ति।

परं कविप्रणीतग्रन्थाभ्यन्तरप्रमाणैरन्यैश्च साधनैः कालिदासो द्वितीयचन्द्रगुप्तस्य विक्रमादित्यस्य सभायां विलसति स्म। इति निश्चीयते। वाकाटकप्रवरसेनस्य सामन्तसभायां विक्रमादित्यस्य प्रतिनिधिरयं कविवरो नियुक्त आसीत्। द्वितीयश्चन्द्रगुप्तः अशीत्यधिकत्रिशतात् क्रिस्ताब्दादारभ्य त्रयोदशाधिकचतुःशतं क्रिस्ताब्दं यावत् पृथ्वीं शशास। अतः कालिदासः क्रिस्ताब्दस्य चतुर्थशतकान्ते बभूव।

अयमुज्जयिन्यां जन्म लेभे। तत्रैव शैशवं यौवनं चातिवाहयामास। नायं वङ्गीयः, न चापि काश्मीरीयः। अनेन कविना रघुवंश–कुमारसम्भव–मेघदूत–ऋतुसंहारादीनि प्रसिद्धानि काव्यानि, अभिज्ञान शाकुन्तल-विक्रमोर्वशीय-मालविकाग्निमित्राणि नाटकानि च विरचितानि।

अस्य कवेः कृतिषु प्रसादगुणः, शब्दार्थयोर्निर्दोषत्वं, अलङ्कारचमत्कारः रस-

प्रकर्षः एते परां काष्ठां प्राप्ताः । मेघद्वारा यक्षस्य स्वपत्न्यै सन्देशो मेघदूते, अजविलापो रघुवंशे, रतेः शोकः कुमारसम्भवे च, एते रसिकानां विदुषां चेतसो नितान्तं रसप्रकर्षं जनयन्ति । शाकुन्तलं नाम नाटकं तु निखिलेऽस्मिञ्जगति सर्वासु भाषासु महद् गौरवास्पदं जातम् । अनेनैकेनैव नाटकेन पाश्चात्यपण्डितानां भारतीयसंस्कृतिप्राधान्यं गीर्वाणवाणीवैभवं च विदितम् ।

"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ॥"

एतत्सुभाषितं सुप्रसिद्धमेव । "यास्यत्यद्य शकुन्तलेति," "शुश्रूषस्व गुरून्," "अभिजनवतो," "भूत्वा चिराय" एतच्छ्लोकचतुष्टयं चिरं सहृदयानां हृदयमन्दिरं प्रविष्टम् । उपमायां सुप्रसिद्धोऽपि अन्यरमणीयालङ्कारेष्वपि निपुणोऽयं महाकविः । "अनाघ्रातं पुष्पं" "न रत्नमन्विष्यति मृग्यते हि तत्" "एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्" इत्यादि स्थलेषु रूपकार्थान्तरन्यासादयोऽप्यनुपमाः । अखिलभूमण्डलेऽयं कविप्रवरः कविरत्नहारे कौस्तुभमणिरिव शोभते ।

---

२७ भवभूतिः ।

अयं महाकविरपि कदा क्व च जात इति न समुपलभ्यते । तथापि कुलवृत्तमस्य तद्ग्रन्थादेव किञ्चिद् विदितं भवति । विदर्भेषु पद्मपुरं नाम नगरमासीत् । उदुम्बराख्यास्तपोनिष्ठा ब्रह्मवादिनो ब्राह्मणास्तत्र न्यवसन् । तैत्तिरीयाणां काश्यपगोत्रियाणां तेषां कुले महाकविर्नाम वाजपेययाजी कश्चन श्रोत्रियो बभूव । तस्य पौत्रो भट्टगोपालः । भट्टगोपालस्य पुत्रो नीलकण्ठो नाम । तस्य पत्नी पतिव्रतावतंसा जतुकर्णी बभूव । भट्टनीलकण्ठाज्जतुकर्ण्यां महाकविर्भवभूतिः समजनि । अस्य श्रीकण्ठ इति चापि नाम वर्तते स्म । अयं व्याकरणन्यायमीमांसाशास्त्रपारग आसीत् ।

अयं कविः कान्यकुब्जेश्वरस्य भोजराजस्य धाराधिपतेर्यशोवर्मणः सभायां सामाजिकप्रधानतां भेजे, इति भोजप्रबन्धादिभ्यो ज्ञायते । परं "सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता"। "ये नाम केचिदिह नः प्रथयन्त्यवज्ञाम्' इत्यादिभिर्वचनैरेष कविः कस्यापि राज्ञ आश्रयं लोकप्रतिष्ठां चाभजत, इति

न भाति। एतादृशैर्वचनैर्निःस्पृहोऽयं कमपि राजानं लोकसमाजं वा न गणयामासेति प्रतीयते। अयमेव कालिदासस्य भवभूतेश्च विशेषः। अस्य प्रबन्धैरेवायं कालिदाससमानमानार्ह इति प्रतीयते किल। परं जीवितावधिरेतस्य प्रसिद्धिस्तादृशी नाभवद् यादृशी पश्चादासीत्। भवतु।

बालरामायणकृता राजशेखरेण भवभूतिर्वर्णितः। बालरामायणस्य प्रणेता राजशेखरः श्रीमच्छंकराचार्याणां समकालीन इति शाङ्करदिग्विजये लिखितम्। ततोऽपि प्राचीनो भवभूतिरित्यनेन निश्चीयते। अनेनान्यैश्च प्रमाणैर्भवभूतिः क्रिस्ताब्दस्य सप्तमशतकस्यान्ते विद्यते स्म। अयं बौद्धानां जेतुः प्रसिद्धमीमांसकस्य कुमारिलभट्टस्य शिष्य इति प्राचीनलेखतो ज्ञायते।

अनेन मालतीमाधवं, महावीरचरितं, उत्तररामचरितं चेति त्रीणि नाटकानि ग्रथितानि। तत्र मालतीमाधवं प्रकरणं वर्तते। एते त्रयः प्रबन्धाः सहृदयहृदयबन्धा वर्तन्ते। एषु महावीरचरितं प्रथमं, 'उत्तररामचरितं चान्ते प्रणीतमिति भाति।

उत्तररामचरिते करुणानुप्राणितो विप्रलम्भशृङ्गाररसः प्रधानः। स च प्रसादवस्तुस्वभावस्फुटत्वादिगुणगुम्फितैः अलङ्कारालङ्कृतैश्चतैस्तैः पदपदार्थैः उद्दीपितः। येन सद्य एव विद्वांसः कामपि कारुण्यपूर्णां लोकोत्तरचमत्कारसारां निर्वृतिमनुभवन्ति।

यथा कालिदासस्योदात्तरसस्तथा भवभूतेः करुणरसः परिपूर्णतां यातः। "कारुण्यं भवभूतिरेव तनुते" इत्युक्तिः प्रसिद्धा वर्तते। अस्मिन् विषय गोवर्धनाचार्यः सप्तशत्यां वर्णयति।

"भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥"

"पापः पञ्चवटीं विलोकयतु वा गच्छत्वसंभाव्य वा" "विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि", "प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्" "द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः" इत्यादिष्वनेकेषु स्थलेषु स च करुणरसः पूर्णतया प्रतीयते। अस्य प्रबन्धत्रये तत्र तत्र वीररसोत्कर्षोऽप्यनुभूयते। महावीरचरितं तु वीररसप्रधानं नाटकम्। अस्मिन् प्रभुरामचन्द्रस्य पूर्वचरितं निबद्धम्। विशेषस्तु तत्तद्ग्रन्थावलोकनादेव ज्ञातव्यः।

२८ भारविः ।

अस्मिन् भारतवर्षे गभीरार्थप्रतिपादकानि काव्यान्यल्पान्येव सन्ति। तेषु किरीतार्जुनीयं नाम महाकाव्यं सुप्रसिद्धम् । अस्य काव्यस्य निर्माता भारविनामधेयो महाकविः कं देशं वंशं च कदाऽलञ्चकार, इति न निर्धारयितुं शक्यतेऽद्यापि । तथाप्ययं महाकविः क्रिस्ताब्दस्य षष्ठे शतके बभूवेति कथयन्तीतिहासविदः। षष्ठशतकस्य क्रिस्ताब्दस्यान्ते भारविः कालिदासवत् प्रसिद्धि प्राप्त इति प्राचीनलेखतो ज्ञायते। केचित्तु महाकविरेष कालिदासस्य समकालीन इति यद् ब्रुवन्ति तत् प्रमाणकोटिं नानुप्रविष्टं भवति।

अनेन महाकविना प्रणीतं किरातार्जुनीयं नामैकमेव महाकाव्यं प्रसिद्धं विद्यते। अस्य काव्यस्य नाम्नैव कथावृत्तं विदितं भवति। इन्द्रकीलनाम्नि पर्वतेऽत्युग्रं तपस्तप्त्वा श्रीरुद्रदेवं प्रसाद्यार्जुनः किरातवेषधारिण ईश्वरात् पाशुपतास्त्रं प्रापेति महाभारतान्तर्गता कथा काव्यस्यास्य मूलम्। "भारवेरर्थगौरवम्" इति वचनानुसारेणास्मिन् काव्ये तत् सुस्पष्टतयाऽनुभूयते । अस्य काव्यस्य केवलं पठणमात्रेणैव स्पष्टतया रसास्वादो जायते । काव्यमेतद् भारतीयानां राजनीतेर्व्यवहारस्य निदर्शकमस्ति। अत्र विविधा नीतयः कविना गभीरैः शब्दार्थैः प्रकटीकृताः।

काव्येऽस्मिन् " न वञ्चनीयाः प्रभवोऽनुजीविभिः ", " हितान्न यः संशृणुते स किं प्रभुः ", "समुन्नयन् भूतिमनार्यसङ्गमाद् वरं विरोधोऽपि समं महात्मभिः ", " व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ", " व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ", " सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ", " सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता ", इत्यादीनि राजनैतिकानि व्यावहारिकाणि च तत्त्वानि तत्र तत्र स्थानेषु गभीरतरशब्दार्थैर्बहूनि ग्रथितानि वर्तन्ते । एषां पठनं न केवलं छात्राणां किन्तु व्यवहारविदां नीतिनिपुणानां वृद्धानामप्यतीवोपयुक्तं भवति ।

२९ दण्डी ।

अस्मिन् भारतवर्षे ये गीर्वाणवाणीकण्ठमणयो विद्वांसः समभूवंस्तेषु दण्डी नाम विख्यातः पण्डितप्रवरः समजनि ।

" उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ "

इत्यस्मिञ् श्लोके कालिदासादिभिः साम्यमस्य प्रदर्शितम् । अस्य कवेर्निवासस्थानं 'अवन्ती' इति केचिन्मन्यन्ते । अपरे तु " कर्नाटकदेशीयोऽयम् " इति वदन्ति । एतत्तु मन्दभाग्यमस्माकं यदेतस्यापि कवेर्जन्मस्थानं कुलादि च न निःसन्दिग्धं ज्ञातुं शक्यते ।

यदा किल भारतवर्षमाक्रमितुं ग्रीसदेशीय अलेक्झाण्डारनामा वीर आजगाम तदा केनचिद् दण्डिना विदुषा सह तस्य सम्भाषणं जातमिति श्रूयते । ' स एवायं दण्डी " इति केषाञ्चिन्मतम् । सप्तविंशत्यधिकत्रिशतात् पूर्वं क्रिस्ताब्दात् आलेक्झाण्डारो भारतमाचक्रामेति ऐतिहासिकाः । तेन हि क्रिस्ताब्दात् पूर्वं चतुर्थशताब्दीयोऽयं दण्डी इति प्रतीयते ।

केचित् तु दण्डिनो दशकुमारचरितात् क्रिस्तीयषष्ठशताब्दीगत्वमस्य प्रतिपादयन्ति । अपरे तु तन्न सहन्ते । यथा केनचित् कालेन दशकुमारचरितस्यांशतो लोपे सति कोऽप्यपरः पूर्वपीठिकामुत्तरपीठिकां च विरचय्य योजितवान् । राज्ञः श्रीहर्षस्य समकालीनस्य बाणभट्टस्य समकालीनोऽयमित्येके कथन्ति । कश्चिदाङ्ग्लपण्डितो विख्यातस्य माघकवेर्दण्डिनश्च समकालत्वं प्रदर्शयति । माघकविस्तु षष्ठशतके क्रिस्ताब्दस्य जातः ।

अनेन कविना दशकुमारचरितादन्यः काव्यादर्शनामाऽलङ्कारग्रन्थः प्रणीतः । दशकुमारचरिते नाम गद्यकाव्येऽस्य कवेः पदलालित्यं सुतरां चकास्ति । तच्च काव्यमपूर्णत्वाद् विच्छिन्नांशत्वाद्वा केनाप्यन्येन पूर्णतां नीतमिति भाति । अस्मिन् काव्ये शृगाङरवीररसौ प्रतीयेते ।

" कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः " इत्युक्त्याऽयं दण्डी प्रथितयशा आसीदित्यनुमीयते ।

अस्मिन् दशकुमारचरिते राज्यभ्रष्टस्य राजहंसस्य राज्ञो वनमधिवसतो-

ऽमात्यपुत्राणां प्राप्तिः तेषां नवामात्यपुत्राणां राजवाहननाम्नो राजहंसकुमारस्य चाद्भूतं चरितमुपवर्णितम् ।

तस्मिन् काव्ये "रुचिरमूर्तिः सराजगुणसम्पूर्तिरसावर्भकोभवदन्वयसम्भवो न भवति", "भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपत्।" "कस्यचित् पुत्रो निन्दापात्रचरित्रो मातङ्गकनामाऽहं" "निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत्" इत्यादिषु बहुषु वाक्येषु दण्डिनः पदलालित्यं प्रतीतं भवति सर्वत्र ।

३० माघः ।

इह खलु भारते वर्षे सत्स्वपि परःशतेषु काव्येषु लघुत्रयीति प्रसिद्धं कालिदासप्रणीतं काव्यत्रयं, बृहत्त्रयीति विख्यातं किरातार्जुनीयं, शिशुपालवधं, नैषधीयचरितं चेति काव्यत्रयमहर्निशं विद्यार्थिभिः पठ्यते । तत्र शिशुपालवधं नाम काव्यं सर्वैर्लक्षणैः प्रधानतमम् ।

अस्य महाकाव्यस्य निर्माता माघकविः क्रिस्ताब्दस्यैकादशशतकस्योत्तरार्धे मालवदेशं शासतो धाराधिपतेर्भोजस्य समकालीन इति भोजप्रबन्ध–प्रबन्धचिन्तामणि–प्रभावकचरितेभ्यः प्रतीयते । परमेते ग्रन्था अत्र विषये न श्रद्धार्हाः । यतस्तत्र भूयान् विपर्ययः समुपलभ्यते । काश्मीरेषु नवमशतकस्योत्तरार्धे जातेन, आनन्दवर्धनाचार्येण ध्वन्यालोके शिशुपालवधात् कानिचित्पद्यान्युद्धृतानि खलु । अत एष कविर्नार्वाचीनः कथमपि नवमशतकात् । परं बाह्याभ्यन्तरप्रमाणेषु विचार्यमाणेषु शिशुपालवधस्य कर्ता माघकविः क्रिस्ताब्दस्य षष्ठशतके बभूवेति निश्चीयते ।

अस्य कवेर्जन्म भिन्नमालवनाम्नि ग्रामे जातम् । अयं ग्रामो गुर्जरदेशे मरुदेशसीमायां विद्यत इति केचिदाहुः । अनेन ग्रन्थान्ते स्ववंशवर्णनं कृतम् ।

श्रीवर्मलाख्यस्य राज्ञः सुप्रभदेवनामा महासेनापतिर्बभूव । दत्तको नाम क्षमी धर्मपर उदात्तस्तस्य तनूजोऽभवत् । तस्य दत्तकस्यात्मजोऽयं महाकविर्माघः । अस्य महाकवेः शिशुपालवधादन्यः कश्चन ग्रन्थो न समुपलभ्यते । अत्र प्रतिपादितः कथांशो ग्रन्थस्य नामत एव ज्ञातो भवति । "माघे सन्ति त्रयो गुणाः" इति वचनानुसारेण कालिदासस्येवोपमा, भारवेरिवार्थगौरवं, दण्डिन

इव पदलालित्यं चास्मिन् काव्ये प्रतीयन्ते । राजनीतिस्तु शिशुपालवधे सर्वोत्कृष्टतया प्रतिपादिता वर्तते । तथा च स्वर्गवर्णनं निसर्गवर्णनमित्यादि परमरमणीयं विद्यते । सुगमशब्दार्थैः प्रतिपादितानां गुणालङ्कारध्वनीनां भावतरङ्गिते रससुधासागरे ये निमज्जन्ति तैः सहृदयैरस्य काव्यस्यालोडनमवश्यं क्रियते ।

अस्मिन् काव्ये "विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा" "समूलघातमघ्नन्तः पराम्नोद्यन्ति मानिनः", "ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम्", "प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता", "प्रक्षिप्योर्दर्चिषं कक्षे शेरते तेऽभिमारुतम्" इत्यादिषु परःशतेषु राजनीतिव्यवहारबोधकेषु वचनेषु उपमाश्लेषार्थान्तरादिभिरलङ्कारैः प्रतिपादितश्चमत्कारो रसिकानां चेतसः कामपि लोकोत्तरामाल्हादतामातनोति। किं बहुना । श्री महोपाध्यायकोलाचलमल्लिनाथसूरिरिदं काव्यं वर्णयति —

"नेतास्मिन् यदुनन्दनः स भगवान् वीरः प्रधानो रसः
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना ।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात् ॥"